CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

६६

॥अथहरितालिकाकथारंभः॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥अथहरतालिकाकथाप्रारभः॥मंदारमालाकुलितालकायै कपालमालांकितशेखराय॥दिव्यांबरायेचदिगंबरायनमःशिवायेचनमःशिवाय॥१॥कैलाशशिखरेरम्येगौरिप्रच्छमिशंकरं॥गुह्याद्गुह्यतरंगुह्यकथयस्वमहेश्वर॥२॥सर्वेषांधर्मसर्वस्वमल्पायासंमहत्फलं॥प्रसन्नोसियदिनाथतध्यंब्रूहिममाग्रतः॥३॥केनत्वंहिमयाप्राप्तस्त्वंदानव्रतादिना॥अनादिमध्यनिधनोभर्तचैवजगत्प्रभुः॥४॥ईश्वरउवाच॥शृणुदेविप्रवक्ष्यामितवाग्रेव्रतमुत्तमं॥यद्गोप्यंममसर्वस्वंकथयामितवप्रिये॥५॥यथाचोडुगणेचंद्रोग्रहाणांभानुरेवच॥वर्णानांचयथाविप्रोदेवानांविष्णुरुत्तमः॥६॥नदीषुचयथागंगापुराणानंचभारत॥वेदानांचयथासामेंद्रियाणांमनोयथा॥७॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुराणवेदेसर्वत्वंआगमेनयथोदितं॥एकाग्रेणशृणुष्वेतत्यथादृष्टंपुरातनं॥८॥
येनपुण्यप्रभावेणप्राप्तंमर्द्धासनंमम॥तत्सर्वंकथयिष्येहंतंममप्रेयसीयतः॥९॥
भाद्रेमासिसितेपक्षेतृतीयाहस्तसोमयक्॥तद्व्रतानुष्ठानमात्रेणसर्वपापेप्रमुच्यते॥
॥१०॥शृणुदेवियथापूर्वंयद्व्रतंचरितंमहत्॥तत्सर्वंकथयिष्यामिवृतंहिमाचले
॥११॥पार्वत्युवाच॥कथंकृतंमयानाथव्रतानांव्रतमुत्तमं॥तत्सर्वंश्रोतुमिच्छाऽ
मित्वत्सकाशान्महेश्वर॥१२॥ईश्वरउवाच॥आसीत्रमहादिव्योहिमवान्नग
उत्तमः॥नानाभूमिसमाकीर्णोनानाद्रुमसमाकुलः॥१३॥नानापक्षिसमाऽ
कीर्णोनानाद्रुमसमाकुलः॥यत्रदेवाःसगंधर्वाःसिद्धचारणगुह्यकाः॥१४॥वि
चरंतियथादेविगंधर्वाध्वनिसंकुलः॥स्फाटिकैःकांचनैःशृंगैमणिवैडूर्य्यभूषितैः॥१

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भुजैर्लिखन्निवाकाशमुदधिर्मंहिरंयथा॥ हिमेनपूरितोनित्यंगंगार्ध्वनिविनादितः॥१६॥
पार्वतीत्वंतत्रबैल्वेचचारपरमंतपः॥ अश्वत्थादशकंदेविधूम्रपानमधोमुखी॥१७॥संव
त्सरंचतुःषष्टिपक्वपर्णाशनंकृतं॥ दृष्ट्वातेनतपःक्लेशंचिंतयादुःखितोभवत्॥१८॥क
स्मैदेयामयाकन्याएवंचिंतातुरोभवत्॥ तदैवांतरतांप्राप्तोब्रह्मपुत्रस्तुधर्मवित्॥१९॥
नारदोमुनिशार्दूलःशैलपुत्रीदिदृक्षया॥ दत्वार्घ्यंविष्टरंपाद्यंनारदायोक्तवान्गिरिः॥२०॥
शैलउवाच॥ किमर्थमागतःस्वामिन्वदत्वमुनिसत्तमः॥ महद्भाग्येनसंप्राप्तंत्वदागम
नमुत्तमं॥२१॥ नारदउवाच॥ शृणुशैलेंद्रमेवाक्यंविष्णुनाप्रेषितोस्यहं॥ योग्ययोग्या
यदातव्यंकन्यारत्नमिदंत्वया॥२२॥वासुदेवसमोनास्तिब्रह्मविष्णुशिवादिषु॥तस्मै
देयात्वयाकन्याअत्रार्थेसंमतंमम॥२३॥गिरिरुवाच॥ वासुदेवःस्वयंदेवःकन्यांप्रार्थ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यतेयद्दि॥तद्दामयाप्रहातव्यालद्दागमनंगोरवात्॥२४॥इत्येवंगद्दितंश्रुत्वातस्यसं
तईधेमुनिः॥ययौपीतांबरधरंशंखचक्रगदाधरं॥२५॥कृतांजलिपुटोभूत्वामुनी
द्रस्तमभाषत॥नारदउवाच॥शृणुदेविभवत्कार्य्योविवाहोनिश्चितस्तव॥२६॥हिम
वांस्तुतदागोरीमुवाचवचनंमुदा॥दत्तासित्वंमयापुत्रीदेवायगरुडध्वजे॥२७॥श्रु
त्वावाक्यंपितुर्देवीसखीभिःसहितावने॥सिंहव्याघ्रमृगेभ्योपेतत्रसुसामिनिर्जने
॥२८॥सख्युवाच॥किमर्थंदुखितावीकथयस्वममाग्रतः॥यतोभवत्प्राणहितं
करिष्येहंनसंशयः॥२९॥एतन्मेचिंतितंकार्यंतत्तेनकृतमन्यथा॥तस्माद्देहप
रित्यागंकरिष्येहंसखिप्रिये॥३०॥पार्वत्युवाच॥सखिशृणुममप्रीतंमनोभिल
षितंमया॥कपर्द्दिनंचभर्त्तारंकरिष्येहंनसंशयः॥३१॥पार्वत्यावचनंश्रुत्वा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सखीवचनमब्रवीत्॥ पितायत्रनजानातिगमिष्यामोहितद्वनं॥३३॥इत्येवंसमंतं कृ०
कृत्वानीतासिलंमहद्वनंतपोनानिरीक्षयामासहिमवांस्तुगृहेगृहे॥३३॥केननीताऽ
सिमेपुत्रीहेवदानव किन्नरैः॥ नारदायकृतंमयंकिंदास्येगरुडध्वजे॥३४॥इत्येवंवि
तयाविष्णेमूर्छितोनिपपातह॥हाहाकृत्वाप्रधावंतिलोकास्तेगिरिपुंगवा॥३५॥ऊ
चुर्गिरिवरंसर्वेमूर्छाहेतुंगिरेवद॥गिरिरुवाच॥दुःखस्यहेतुंशृणुतकन्यामद्वनंऽ
मम॥३६॥दृष्टावाकाल्वसर्पेणसिंहव्याघ्रेणवाहता॥नजानेकगतापुत्रीकेनदुष्टे
नवाघृता॥३७॥चकंपेशैलकंतप्तोवातेनेवमहातरुः॥गिरिर्विनाद्वनंयातस्तदाऽ
कनकारणात्॥३८॥सिंहव्याघ्रैश्चभल्लूकैर्हरिभिःसहितंत्वयं॥त्वंवापिविपिने शिव
घोरेव्रजंतीसविभिःसह॥३९॥तत्रद्वीपेनदीरम्यांतटेचमहागुहां॥तांप्रविश्य ३

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सखीसार्द्धंमन्नभोगविवर्जिता ॥४०॥ संस्थाप्यवालुकापिंडंपार्वत्यासहितस्यमे ॥
यातृतीयाभाद्रपदेहस्तनक्षत्रसंयुता ॥४१॥ तत्रयाहित्रयंनिनेनरात्रौजागरणंकृतं ॥
तेनव्रतप्रभावेनआसनंचलितंमम ॥४२॥ संप्राप्तोहंतदातत्रयत्रत्वंसखिभिःसह
प्रसन्नोस्मिमयाप्रोक्तंवरंब्रूहिवरानने ॥४३॥ पार्वत्युवाच ॥ यदिदेवप्रसन्नोसिभर्ता
भवतुमेहरः ॥ तथेत्युक्तातुतांदेवीकैलासंपुनरागतः ॥४४॥ ततःप्रभातेसंप्राप्ते
नद्यांसर्वविसर्जितं ॥ पारणंतुकृतंतत्रसख्यासार्द्धंत्वयाशुभं ॥४५॥ हिमवान
पितंदेशमाजगामवनंघनं ॥ चतुरंगनिरीक्षंतुविह्वलःपतितापुनः ॥४६॥
दृष्ट्वातत्रनदीतीरेप्रसूतैकन्यकाद्वयं ॥ उत्थाप्योसंगमारोप्यरोदनंकृतवान्
गिरिः ॥४७॥ सिंहव्याघ्राहिभल्लूकघनेदुर्गेततःस्थिता ॥ पार्वत्युवाच ॥ शृणुता

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तमयाज्ञातंवंहास्यसीश्वरायमा ॥४८॥तदन्यथाकृतंतातेनाहंवनमागता॥
दहासितातयदिमामीश्वरायतदागृहं ॥४९॥आगमिष्यामिनेवंचेद्विहस्य
स्यामिनिश्चितं॥तयेयुक्काहिमवतासिवंगृहंप्रति॥५०॥पश्चाद्दत्वात्वम
स्माकंकृत्वावेवाहिकींक्रियां॥तेनव्रतप्रभावेनसौभाग्यंसाधिनंत्वया॥५१॥
अद्यापिव्रतराजस्तुनकस्यापिनिवेदितः॥नामास्यव्रतराजस्यशृणुदेवि
याभवत्॥५२॥आस्त्रीभिर्हितायस्माद्दतःसाहरितालिका॥पार्वत्युवाच॥
मेदंकथितंतस्यविधिंवेदमयंप्रभो॥५३॥किंपुण्यंकिंफलंचास्यकेनचक्रियते
व्रते॥ईश्वरउवाच॥शृणुदेविविधिंवक्ष्येनारीणांव्रतमीदृशं॥५४॥करिष्यसिद
प्रयत्नेनयदिसौभाग्यमिच्छसि॥तोरणादिप्रकर्तव्यंकदलीस्तंभमंडितं॥५५॥

वि

शिव ४

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आछाद्य पट्टवस्त्रेतु नानावर्णविचित्रितैः॥ चंदनेन सकुंकुमेन लेपयेद्गृहमंडपं॥५६॥
शंखभेरीमृदंगैस्तु कारयेद्बहुनिःस्वनैः॥ नानामंगलगीतं च कर्त्तव्यं मम सन्निधौ॥
स्थापयेद्गालुकालिंगं पार्वत्या सहितं मम॥ पूजयेद्बहुपुष्पैश्च गंधधूपादिभिर्नवैः॥५८॥
नानाप्रकारैर्नैवेद्यैः पूजयेज्जागरं चरेत्॥ नारिकेलैः पूगफलैर्जंबीरैर्बिल्वकुलैस्तथा॥
॥५९॥ बीजपूरैः सनारंगैः फलैश्चान्यैश्च भूरिशः॥ ऋतुकालोद्भवैर्भूरिप्रकारैः कंदमूलकैः॥६०॥ धूपादिगंधैश्च तथा मंत्रेणानेन पूजयेत्॥ नमः शिवायशांतायऽ
पंचवक्त्रायशूलिने॥६१॥ नंदिस्थगमहाकालगणयुक्तायशंभवे॥ शिवायेहरकां
तायेप्रकृत्यैसृष्टिहेतवे॥६२॥ शिवाद्यासर्वमंगल्ये शिवरूपेजगन्मये॥ शिवेक
ल्याणिहेनित्यं शिवरूपेनमोस्तुते॥६३॥ शिवरूपेनमस्तुभ्यं शिवायेसततंनमः॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नमस्तेब्रह्मरूपिण्येजगद्धात्र्येनमोस्तुते॥६४॥संसारभयसंतापत्राहिमांमिहधा
हिनी॥येनकामेनदेवित्वांपूजतोसिमहेश्वरी॥६५॥राज्यंसौभाग्यसंपत्तिंदेहिमांम
मपार्वती॥मंत्रेणानेनदेवित्वांपूजयित्वामयासह॥६६॥कथांश्रुत्वाविधानेनदद्याद
न्नंचभूरिशः॥ब्राह्मणेभ्योयथाशक्त्यादेयावस्त्रहिरण्यगाः॥६७॥अन्येभ्योदीयतेभू
रिस्त्रीणांवाभूषणादिकं॥भर्त्रासहकथांश्रुत्वाभक्तियुक्तेनचेतसा॥६८॥कृत्वाव्रते
श्वरदेविसर्वपापैःप्रमुच्यते॥सप्तजन्मभवेद्राज्यंसौभाग्यंचैववर्धते॥६९॥तृतीयायां
तुयानारीआहारंकुरुतेयदि॥सप्तजन्मभवेद्वंध्यावैधव्यंजन्मजन्मनि॥७०॥दारिद्र्यपु
त्रशोकंचकर्कशदुःखभागिनी॥पच्यतेनरकेघोरेनोपवासंकरोतिया॥७१॥यदि
तेकांचनेतांम्रेवेणवेचाथमृण्मये॥भाजनेवित्यसेदन्नंसवस्त्रंफलदक्षिणं॥७२॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वायनंद्विजवर्यायदद्यात्तेचपारणं॥एवंविधंयाकुरुतेचनारीव्रतंमासमानंरमतेत
भर्त्रा॥भोगाननेकानुभुविभुज्यमानासायुज्यमंतेलभतेहरेण॥७४॥अश्वमे
सहस्राणिवाजपेयशतानिच॥कथाश्रवणमात्रेणतत्फलंप्राप्यतेनरैः॥७५॥एत
त्तेकथितंरैवतवायेव्रतमुत्तमं॥कोटियज्ञकृतंपुण्यंमस्यानुष्ठानमात्रतः॥७६॥
इतिश्रीभविष्योत्तरपुराणेहुतानिकाव्रतकथासमाप्तं॥संपूर्ण॥श्रीरस्तु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi